International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(1): 119-120
© 2017 IJSR
www.anantaajournal.com
Received: 30-11-2016
Accepted: 31-12-2016

**शुचिस्मिता पाणिग्राही**
शोधच्छात्रा, पुराणेतिहासविभाग:
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति: आंध्र प्रदेश, भारत

**Correspondence**
**शुचिस्मिता पाणिग्राही**
शोधच्छात्रा, पुराणेतिहासविभाग:
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति: आंध्र प्रदेश, भारत

# नलाभ्युदयकाव्ये प्राचीनकाव्यानां प्रभाव:

**शुचिस्मिता पाणिग्राही**

## प्रस्तावना

संस्कृत साहित्यशास्त्रस्यापरं नाम काव्यशास्त्रमिति। काव्यशास्त्रमिति शब्दस्य प्रयोग: अलङ्कारशास्त्रस्य कृते प्राक्तनकाले आसीत्। अस्मिन् शास्त्रे काव्यप्राणभूता: गुण-दोष-रीति-अलङ्कारादीनां तत्त्वानां निरूपणं भवति। तथैव काव्यस्वरूप-प्रयोजन-हेतुलक्षणानां विषये चर्चा वर्तते। काव्यस्य मुख्योद्देश्यं वर्त्तते 9 सद्य: परनिवृत्ति:"[१] अर्थात् झटिति अलौकिकानन्दस्य अनुभूति:। एतादृशानन्दाय एव सहृदय: काव्यान्युपवेसते काव्यं पठति, रसानुभूतिनिमित्तं काव्यमभ्यसति च।

महाभारतं संस्कृतसाहित्यस्य जन्मदाता उच्यते। काव्य-नाटक-कविकृत्तीनां प्रेरणादायक-तत्वानि अत्र ग्रन्थे विपुलतया समुपलभ्यन्ते। पञ्चम वेदोऽयम् उत्तरवर्त्तिसंस्कृतसाहित्यस्य मूलरूप:। अत्र विद्यमाना: विषया: कालिदास-माघ-भारवि-वामनभट्ट बाण-भवभूति-बाणभट्टादीनां कृतिषु रुचिरतया विलसन्ति।

## नलाभ्युदयकाव्ये इतिवृत्तम्

इतिवृत्तं काव्यशरीरं भवति। विना शरीरं तत्र रूपमेव नास्ति। रूपं विना सौन्दर्य पोषकालङ्काराणां किं प्रयोजनम्? रूपहीनशरीरं प्रणहीन शरीरवत् भवति। तस्मादितिवृत्तमवश्यं भवत्येव।

वामनभट्टबाणस्य पद्यकाव्येषु अन्यतमं नलाभ्युदयकाव्यम्। एतत्स्वर्गान्तर्गतवर्णनै: सर्गसंख्यया च महाकाव्योपदेश हि भवति। अस्येतिवृत्तं महाभारतस्य वनपर्वण: नलोपाख्यानात् स्वीकृतम्।

प्रकृतनलाभ्युदयकाव्यस्य इतिवृत्तं महाभारतान्तर्गतवनपर्वणि नलोपाख्यानरूपम्। तदेवाधारीकृत्य वामनभट्टबाण: नलाभ्युदयं लिलेख।

अत्र हि काव्ये अष्टसर्गेषु क्रमश: नलदमयन्त्योर्मध्ये राजहंसकृतपरस्परानुराग:, स्वयम्बरद्वारा तयोर्विवाह:, कलिप्रभावेण नलदमयन्त्योर्वियोग:, कर्कटकप्रभावेण नलस्य विकृतरूपप्राप्ति:, नलस्य ऋतुपर्णस्य समीपं गमनम्, दमयन्त्या: चेदीश्वराश्रयणम्, पुण्याहवचननिमित्तमागतेन सुदेवेन दमयन्त्या: जनकप्राप्ति:, ऋतुपर्णसाहाय्येन नलस्य दमयन्ती समागतसिद्धि:, नलस्य पुनर्गतवैभवप्राप्ति: इत्येते विषया: वर्णिता: दृश्यन्ते।

महाभारतस्य वनपर्वणि नलोपाख्यान माधारीकृत्य काव्यमिदं कविना विरचितम्। परन्तु कविरयं स्वकाव्ये स्वकाव्यप्रतिभा कौशलं प्रदर्शितवान्। आख्यानरूपं नलोपाख्यानं काव्यरूपं एतेन प्रदत्तम्। काव्ये सौन्दर्यवर्द्धक तत्त्वानि समायोजितानि। यथा - रसा:, अलंकार:, ध्वनि:, रीति: वक्रोक्ति:, गुणा:, दोषा: इत्यादय: काव्यस्य सौन्दर्यपरिपोषका: भवन्ति।

अस्मिन् नलाभ्युदयकाव्ये केवलं कृति: न दृश्यते अपि तु प्राचीनकाव्यानां प्रभावोऽपि दरीदृश्यते।

## प्राचीनकाव्यप्रभाव

वामनभट्टबाणस्य कालिदासभारव्यादिषु महद्गौरवं विद्यते। तदभिव्यञ्जयन्निव तत्र तत्र सन्निवेशकल्पने वर्णने वा तामनुकरोति, क्वचित् तेषां पदानि स्वकाव्ये प्रयुञ्जते च कवि:।

## किरातार्जुनीयकाव्यस्यप्रभाव

नलाभ्युदये प्रथमसर्गे नलस्य राज्यशासनवर्णनागत: श्लोक: किरातार्जुनीये प्रथमसर्गे दुर्योधनराज्यशासनवर्णने भारविणा प्रयुक्तं श्लोकमनुकरोति। यथा नलाभ्युदये –

क्षेमङ्करे तस्य करे जगत्याः ससर्ज वृष्टिं समये विधाता।
रराज सस्याभरणा धरित्री प्रजाश्च नित्योत्सवमन्वभूवन्।।[२]

**कुमारसम्भवस्य प्रभावः**

कुमारसम्भवे पार्वती मदनावस्थारूढा त्रिभागशेषासु निशासु समुत्थाय मिथ्याश्लेषमभिनयति 9शिव क्व व्रजसीति" पृच्छन् भ्रान्तिमनुभवति। नलाभ्युदये अस्य श्लोकस्य ईषदनुकरणं दृश्यते। मदनशराहतस्य नलस्य वर्णने यथा-

प्रत्युषशेषासु विभावरीषु कथञ्चिदामुद्रितलोचनान्तः।
रूतेन तारेण विबोध्यमानः स विव्यथे पञ्जरशारिकाणाम्।।[३]

**रघुवंशस्यप्रभावः**

नलाभ्युदये नलोद्यानवने तेन विसृष्टः राजहंसः दमयन्तीसमीपं गत्वा नलदमयन्त्योस्समगुणयोगवैशिष्ट्यं निरूपणसमये वामनभट्टबाणेन वर्णितः श्लोकः कालिदासस्य रघुवंशे षष्ठसर्गे इन्दुमतीस्वयम्बरसन्दर्भे सुनन्दयोक्तिर्श्लोकमनुकरोति। यथा -

वपुषा वयसा नवेन कान्त्या विनयौदार्यमुख्यैर्गुणैश्च तेस्तैः।
निषधाधिपते स्त्वमेव तुल्या त्रिषु लोकेषु तवैष एव तुल्यः।।[४]

अन्यत्र च वामनभट्टबाणः दमयन्तीस्वयम्बरसन्दर्भे स्वयम्बररागतां राज्ञां सिंहासनारोहणमभिवर्णयन् रघुवंशे इन्दुमतीस्वयम्बरसन्दर्भश्लोकंमनुकरोति यथा -

अध्यास्य रत्नद्युतिरञ्जितानि हैमानि भद्रासनमण्डलानि।
अवापुरारूढसुमेरुश्रृङ्गैः साम्यं युवानो मृगराजशावैः।।[५]

दमयन्तीस्वयम्बरसन्दर्भे वामनभट्टबाणः कालिदासीय मन्यदपि श्लोकमनुकरोति। प्रकृत नलाभ्युदये दमयन्त्याः स्वयम्बरे समागतानां राजानां मुखवर्णनम्। यथा -

अतीत्य सा यं यमरालकेशी जगम भूपं राशिनः प्रभवे।
स स प्रपेदे मुकुलिकृतश्रीः प्रातः कुमुद्वानिव दीन भावम्।।[६]

श्लोकोऽयं रघुवंशे इन्दुमती स्वयम्बरे तथा तिरस्कृतराज्ञां मुखानि कान्तिहीनानि बभूवः इति वर्णयन्ति। तद्यथा 9सञ्चारिणी............"७ इत्यादि श्लोकः अनुकरण रूपः।
बाणः अर्थान्तरन्यासेऽपि कालिदासपद्धतिमनुकरोति। यथा -

सा वर्ण्यमानान् क्रमशोध्य भैमी शनैरतीयाय शतं नरेन्द्रान्।
क्षितौ तटाकाः शतशो भवन्तु नाथस्तु नद्या नदराज एव।।[८]

अयं श्लोकः रघुवंशे रघसूनोरजस्य वर्णनमनुकरोति।

**अभिज्ञानशाकुन्तलस्य प्रभावः**

अभिज्ञानशाकुन्तले कण्वः शकुन्तलां परकीयधनमिति मत्वा तां दुष्यन्ताय संप्रेष्य विशर्णचित्तः भवति। नलाभ्युदये वामनः 9अथोहि कन्या परकीया एव"९ इति कन्याविषयकं श्लोकमनुकुर्वन् नलविरहसन्दर्भे प्रयुक्तवान् यथा - नलविरहमनुभवन् कन्यां दृष्ट्वा भीमः कन्यागरुं वरविषये प्रष्टुकामः एवं वदति।

पृच्छेम वा दूतमुखेन भीमं कन्या खलु स्वं परकीयमेव।
चित्ते तदीये कुलशीलरूपैः को नाम धन्योऽभितो वरोऽस्याः।।[१०]

**पुनः रघुवंशस्य प्रभावः**

दमयन्ती स्वकराभ्यां पुष्पमालां नलस्य कण्ठे निक्षिप्तवतीति विषयबोधकः श्लोकः कालिदासस्य रघुवंशे इन्दुमत्याकृतम् अजवरणमनुकरोति। यथा -

ततः स्त्रजं सौरभलीनभृङ्गां प्रत्यग्रकल्हारदलावनद्धाम्।
पतिंवरा पाणिसरोरूहाभ्यामासज्जायामास नलस्य कण्ठे।।[११]

एवं रूपेण दमयन्त्याः स्वयम्बरप्रधानः पञ्चमसर्गः रघुवंशे वर्णित स्वयबरं सम्पूर्ण मनुकरोति।

**उपसंहारः**

एवं प्रकारेण 9नलाभ्युदयकाव्ये प्राचीनकाव्यानां प्रभावः" नितरां वर्त्तते इति वक्तुं शक्यते। वामनभट्टबाणस्य रचनामिदं कालिदासादीनां ग्रन्थरचना परवर्तीति ज्ञायते। अस्मिन् काव्ये कुमारसम्भव-अभिज्ञानशाकुन्तल-रघुवंशादि काव्यानां प्रभावः नितरां परिदृश्यते। अतः ज्ञायते यत् एषः कविः कालिदासादीनां परवर्तीति। तेषां रचनाशैलीं मनसिनिधाय कविः सौन्दर्यबोधकतत्वानि समायोज्य काव्यमिदं रचितवान् इति ज्ञायते।

**टिप्पणी**

१. सा.द.ष.प.
२. न.भ्यु., १/१३
३. न.भ्यु., १/४४
४. न.भ्यु., २/४४
५. न.भ्यु., ५/३
६. न.भ्यु., ५/२७
७. रघु.ष.स.
८. न.भ्यु.,५/२५
९. अ.भि.,४/२२
१०. न.भ्यु., १-५६
११. न.भु., ५/४४

**सहायक ग्रन्थ सूची**


१. अभिज्ञानशाकुन्तलम्-नारायण राम आचार्य, चौखम्बा संस्कृतप्रतिष्ठान-२०१२
२. किरातार्जुनीयम्-श्री बदरीनाराायण मिश्रः, चौखम्बा सुरभारती प्रकाशन वारणासी-२०१२
३. कुमारसम्भवम्-शेषराज शास्त्री, चौखम्बा संस्कृत संस्थान वारणासी-१९८७
४. नलाभ्युदयः-वामनभट्टबाणः, त्रिवेन्द्रं संस्कृत सरीरिज, त्रिवेन्द्रम्-१९१३
५. रघुवंशम्-श्रीहरगोविन्द मिश्रः, चौखम्बा संस्कृत संस्थान, वारणासी-२००३